National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 193-195
© 2025 NJHSR
www.sanskritarticle.com

**श्रीधर राउतः**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**श्रीधर राउतः**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपति

# चिलिकाकाव्ये अलङ्कारसौन्दर्यम्

**श्रीधर राउतः**

**उपक्रमः**

साहित्यशास्त्रस्य अन्यनाम भवति सौन्दर्यशास्त्रं, काव्यशास्त्रम्, अलङ्कारशास्त्रञ्चेति। तत्र काव्यानां सौन्दर्यं परिलक्ष्य शास्त्रस्यास्य अलङ्कारशास्त्रम् इति नाम भवति। अलङ्कारशब्दः भूषणार्थे 'अलं' पूर्वक 'कृ'धातोः करणे भावे वा 'घञ्'प्रत्यये निष्पद्यते। करणार्थे अलंक्रियतेऽनेनेति विग्रहेण उपमादयः अलङ्कारा गृह्यन्ते । भावार्थे तु अलङ्करणमलङ्कारः इति विग्रहेण सौन्दर्यमित्यर्थः।

**कविपरिचयः-**

कविः तस्य पुण्यजन्मभूमेः पवित्रवातावरणेन नूनं प्रभावितो भवति। पवित्रभारतभूखण्डे ओडिशाराज्यस्य संस्कृतविद्वत्सु डॉ. क्षीरोदचन्द्रदाशः अन्यतमः। सः १९५४ तमे सम्बत्सरे ओडिशाराज्यस्य कटकमण्डलान्तर्गत "माहाङ्गा" विधानसभाक्षेत्रे "नुर्तङ्ग" ग्रामे जन्मग्रहणं कृतवान्। सम्प्रति डॉ. क्षीरोदचन्द्रदाशमहोदयः स्वस्य जन्मस्थानं विहाय ओडिशाराज्यस्य खोर्द्धाजिल्ला–अन्तर्गत-भुवनेश्वरनिकटस्थ 'पात्रपडा'-अञ्चलस्य उदयनगिरिविहारे निवसति।

प्राक् सूचनानुसारं ज्ञायते यत् राधानाथेन भञ्जीययुगे प्रयुक्तानां शब्दालंकाराणां तथा अर्थालंकाराणां प्रयोगं स्वकाव्ये न कृतमिति। अपितु तस्य काव्यसुन्दरी यमकानुप्रासैव शब्दालंकारैः, व्यतिरेक- अनन्वय-उत्प्रेक्षा-उपमा-रूपकसैव सरलैः अर्थालंकारैरलंकृतासीत्।

**व्यतिरेकालङ्कारः-**

लक्षणम्-

**उपमानाद् यदन्यस्य व्यतिरेकः स एव सः।**[1]

चिलिकाकाव्ये तदुदाहरणं यथा-

**विवर्ध्य सम्यग् विपरीतकान्तिमान्दोलिता श्यामलपृष्ठकेशाः।**
**सौगन्धिकान्धीकृतषट्पदानामुदृञ्चनैराकुलिता च वामा॥**[2]

**अनन्वयरलङ्कारः-**

कविराजविश्वनाथमतेन अनन्वयरलङ्कारस्यलक्षणं यथा-

**उपमानोपमेयत्वमेकस्यैव त्वनन्वयः॥**[3]

चिलिकाकाव्ये तदुदाहरणं यथा-

**सिंहासने तत्र निषेदुषी या तस्यास्तुला सा जगति स्थिता नु।**
**कुञ्ज समावेशितपारिजाते सैवाब्धिमन्थोत्थितलक्ष्मीरूपा॥**[4]

**उत्प्रेक्षालङ्कारः -**

उत्प्रेक्षालङ्कारस्य भव्यप्रयोगोऽपि कविना मुक्तकेऽस्मिन् तारुण्यशतके रमणीया रीत्या कृतो दृश्यते। उत्प्रेक्षालक्षणं तु साहित्यदर्पणे यथा

**भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।**[5]

यत्र प्रकृतस्य उपमेयस्य परात्मना उपमेयात्मना सम्भव्यते तत् उतप्रेक्षालङ्कारः भवति।

तदुदाहरणं यथा-

**समुद्गतः श्वेतचढाइगेहकः ऐरावतोऽब्धेर्जलभेदको यथा।**

**तरङ्गसम्बेष्टितकाङ्कणोगिरिः फलैरनिन्द्यां सुषमां प्रयच्छति॥**[6]

उदाहरणान्तरं यथा- शोलेरिशैलं बृहदिन्द्रनीलं दृष्ट्वा मतौ मे भवति प्रतीतिः । वैरोचनः किं मयसृष्टयानेनोर्ध्वं प्रयाति क्षितिभेदनान्ते ।।६८

**यमकम्-**

लक्षणम् -

**अर्थ सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः।**

**यमकम् पादतद्भागवृत्ति तद्यात्यनेकताम्।।**[7]

अर्थात् वाच्यार्थे सति भिन्नार्थकस्य स्वरव्यञ्जनसमुदायस्य अज्झलसंघातस्य वा क्रमेण आवृत्तिं पुनरुच्चारणं वा यमकमित्यालङ्कारिकाः प्रवदन्ति। आवृत्तिगतपदं कदाचित् सार्थकं कदाचित् निरर्थकमिति स्यात्।

आदौ यमकालंकारः पादगतः, पादांशगत इति द्विविधः। पादगतयमकालंकारः एकादशभेदयुक्तः। यथा- १. मुखयमकः २. संन्देशयमकः ३. आवृत्तियमकः ४ गर्भयमकः ५. संन्दष्टकयमकः ६. पुच्छयमकः ७. पंक्तियमकः ८. युग्मकयमकः ९. परिवृत्तियमकः १०. समुद्ग नाम यमकः ११. महायमकश्च। पादभागवृत्तित्वेनापि अस्य यमकस्य अनेके भेदाः सम्भवन्ति।

चिलिकाकाव्ये तदुदाहरणं यथा-

**चलच्छदैः पिप्पलनामवृक्षो यः श्रीफलस्त्र्यम्बकरागवद्धः।**

**विशालशाल्मल्यतिवृद्धकाये श्येनस्य युग्मं प्रकरोति नीडम्।।**[8]

**अनुप्रासालङ्कारः-**

लक्षणम्- **वर्णसाम्यमनुप्रासः**[9]।

अर्थात् यत्र वर्णानां साम्यं भवति तत्रानुप्रासालङ्कारः। अयं च द्विविधः छेकानुप्रासः, वृत्त्यनुप्रासश्चेति।

शुभोत्कलश्रीसुविलासदीर्घिका नीलाम्बुकान्ता चिलिका मरालिका। त्वमुत्कलानां नवचारुमण्डनं तेषामसि त्वं सुषमानिकेतनम्॥[10]

अन्यदुदाहरणम्-

**छूरीअनाकुञ्जविहारिणी सा या साक्षिगोपीयुतनाथरम्या।**

**स्नानैश्च लक्ष्म्याः परिपूतनीरा सौगन्धिकैः रत्नचिरा चकास्ति॥**[11]

**रुपकरलङ्कारः –**

काव्येऽस्मिन् चिलिकाकाव्ये वहुत्र रुपकरलङ्कारस्य प्रयोगः दृश्यते। रुपकलक्षणं यथा मम्मटेन काव्यप्रकाशे – **तद्रुपकमभेदो य उपमानोपमेययोः**।[12]

उपमानोपमेययोः यः अभेदारोपः तद् रुपकमित्यर्थः।

तदुदाहरणं यथा-

**सरस्वतीपूजनयोग्यपद्मप्रफुल्लकालः सहसानुकूलः।**

**नवोदितैर्भञ्जरवेः करैस्तदुन्मील्यतेऽद्धा कविहृत्सरःसु॥**[13]

**उपमालङ्कारः-**

उपमालङ्कारस्य मनोज्ञान्युदाहरणानि काव्येऽस्मिन् तरुण्यशतके प्रायशः प्रतिपद्यमुपलक्षते। अत्र काव्ये वहिः प्रकृतिवर्णने अन्तः प्रकृतिवर्णने च उपमालङ्कारः भूयः परिदृश्यते। उपमायाः लक्षणमुपस्थापयत् चन्द्रालोके जयदेवः लिखति-

**उपमा यत्र सादृशलक्ष्मीरुल्लसति द्वयोः।**[14]

अर्थात् यत्र उपमानोपमेययोः सहृदयहृदयाह्लादित्वेन चारुसादृश्यं व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालङ्कारः। उपमालङ्कारो यथा-

**मैनाकशैलः फणिराजशोभी विराजतेऽस्मिन् रणपत्तनेशा।**

**आस्ये प्रतीच्याः किमु शैलपुत्रं मदैर्मृगाणामिह पत्रचित्रम्॥**[15]

अन्यदुदाहरणम्-

**तारा यथा मज्जति सौरदीप्तौबस्मीति' मग्नं बहुविस्मयेऽस्मिन्।**

**भीराप्य दूराद्गुरुकल्पकेभ्यरासीः सदा त्वं स्मरणे सखी मे॥**[16]

**<u>सहायकग्रन्थसूची</u>**

1.काव्यप्रकाशः - झलकीकर टीका, परिमल पब्लिकेशनस्, दिल्ली, तृतीय संस्करण-2012

2.काव्यप्रकाशः - मणिव्यख्या सहितः, व्याख्याकारः –डा. सूर्यमणि-रथः, प्रथम संस्करणम् -2004

3. काव्यप्रकाशः-डा. सूर्यमणिरथः,श्रीसदाशिवपरिसरः,पुरी, २००४।

4. काव्यप्रकाशः(मम्मटः),झलकीकरटीका-परिमलपब्लिकेशन,दिल्ली, परिमलसंस्कृतग्रन्थमाला- 97

5.साहित्यदर्पणः (चन्द्रकला-हिन्दीव्याख्या) - आचार्य शेषराजशर्मा-रेग्मी, कृष्णदास अकादमी, वाराणसी, १९९५

6. साहित्यदर्पणः, शशीकलाटीका, चौखम्बा विद्याभवन वाराणसी- -221001

7.चन्द्रालोकः - डा. कृष्णमणित्रिपाठी, चौखम्बासुरभारतीप्रकाशन, वाराणसी, १९९९

8.चिलिका -डॉ. क्षीरोदचन्द्रदाशः मोतिलाल वाराणसी नई देल्ली – ११०००२, २०२२

## पाद टिप्पणी

[1]का.प्र.10/ 143

[2]चिलिका.105/89

[3]सा.द.26/673

[4]चलिका.103/88

[5]सा.द.-10/40

[6]चिलिका.6

[7]का.प्र. -9/86

[8]चिलिका-51/62

[9]का.प्र, कारिका-79

[10] चिलिका.1

[11] चिलिका.83

[12] का.प्र.10.139

[13] चिलिका.115

[14] चन्द्रालोक.5/11

[15] चिलिका.71

[16] चिलिका.31